समनन्तरमेवोच्यन्ते । अत्रोपपत्तिः । समायां भूमौ वृत्तं भगणकलाङ्कितं तिर्य्यगूर्द्ध्वाधरव्यासमितरेखाभ्यां चतुर्भागं कार्य्यं तत्रोर्द्ध्वरेखासक्तपरिधिप्रदेशादुभयत्र समविभागं विगणय्य तदग्रयोर्बद्धं सूत्रं वृत्ते द्विगुणविभागमितसम्पूर्णचापस्य सम्पूर्णज्या । अत्र गणिते ऊर्द्ध्वरेखातोऽर्द्धज्याया एव प्रयोजनात् तदर्द्धचापस्यज्यार्धमर्धज्या । एवं वृत्तचतुर्थांशे ऊर्द्ध्वरेखातोऽभीष्टांशानां चापार्धाकाराणामर्धज्या अभीष्टा गण्याः । तत्र भगवता स्वेच्छया वृत्तचतुर्थांशे त्रिराशिमिते चतुर्विंशज्ज्याः कल्पितास्तज्ज्ञानं तु वृत्ते चक्रकलानामङ्कितत्वात् तत्परिधिव्यासार्धं त्रिराशिज्यान्तिमा ३४३८ । यदा भनन्दाग्निमितपरिधौ ३९२७खबाणसूर्य १२५०मितो व्यासस्तदा चक्रकलापरिधौ क इत्यनुपातेन व्यासानयनम् । यथा चक्रकलाः २१६०० खबाणसूर्य्य १२५०गुणाः २७०००००० भनन्दाग्नि ३९२७ भक्ता व्यासः ६८७६ एतदर्धमन्तिमा ज्या ३४३८ । अथ वृत्ते चापज्ययोर्विवेके तयोरतुल्यत्वमपि भगवता कोऽपि वृत्तभागः समोऽस्त्यन्यथामलकादौ सम्प्रपाद्यवस्थानं न स्यादिति मत्वा तद्भागस्य ज्या तत्तुल्यैवेत्युक्तम् । “वृत्तस्य षण्णवत्यंशो दण्डवद्दृश्यते तु सः” इति शाकल्योक्तेः प्रथमज्या चक्रकलाद्वादशांशरूपैकराशिकलानामष्टमोऽंशस्तत्त्वाश्विमितः २२५ एतन्मितमेव प्रथमचापमत एतदन्तरेणाभीष्टा ज्यास्तु वंशत् । अथ चतुर्विंशति जीवानां यथोत्तरमुपचयात् तदन्तररूपखण्डानां यथोत्तरमपचयस्य वृत्ते ज्याङ्कनेन प्रत्यक्षत्वाज्ज्यान्तररूपखण्डानामन्तरं यथोत्तरमुपचितमिति द्वाविंशतित्रयोविंशतिचतुर्विंशतिज्यानामन्तरयोरन्तरमिदं परमं खण्डान्तरं सूक्ष्मज्योत्पत्तिप्रकारेणावगतं १५।१६ ।४८ । अथ यदि त्रिज्ययेदं खण्डकान्तरं तदा प्रथमज्यया किमित्यनुपातेन फलप्रमाणयोः फलेनापवर्त्त्य प्रमाणस्थाने तत्त्वाश्विनोऽनेन भक्तः प्रथमज्या फलं पूर्व्वद्वितीयखण्डयोरन्तरम् । अनेन पूर्व्वखण्डं हीनं द्वितीयं खण्डं भवति । तत्र पूर्व्वखण्डं प्रथमज्यातुल्यमेव । द्वितीयखण्डं प्रथमज्यायां युतं द्वितीयज्या । एवमस्यास्तत्त्वाश्विभागलब्धं द्वितीयतृतीयखण्डकयोरन्तरमनेन द्वितीयखण्डमूनं तृतीयखण्डमिदमनेन द्वितीयज्या युता तृतीयज्या । एवं चतुर्थ्याद्याः । तत्र पूर्वमर्धाभ्यधिकग्रहणेनोत्तरत्राधिकान्तरपातसम्भावनया क्वचित् क्वचिदर्धाभ्यधिकावयवस्यैकाधिकत्वेन ग्रहणम् इत्युपपन्नं सोक्त-

दयम्” रङ्ग० । उत्क्रमज्याङ्कास्तु ज्याशब्दे वक्ष्यन्ते

**क्रमण** पु० क्रामत्यनेन करणे ल्युट् । १चरणे हेम० । २यदुवंश्ये नृपभेदे “क्रमिश्च क्रमणश्चैव दृष्णः शूरः पुरञ्जयः” हरिवं० ३८अ० । भावे ल्युट् । ३पादन्यासे न० । “पृष्ठे त्वधर्म्मं क्रमणेषु यज्ञम्” भाग० ८,१०,२१, “पदैस्तुभिः क्रमणेऽपि तस्य नः” नैष० । [भेदे ।

**क्रमजटा** स्त्री ऋग्वेदशब्दे १४११पृ० दर्शिते वेदपाठप्रकार-

**क्रमदण्डक** पु० ऋग्वेदशब्दे १४११पृ०दर्शिते वेदपाठप्रकारभेदे

**क्रमदीश्वर** पु० संक्षिप्तसारव्याकरणकारके विद्वद्भेदे “संक्षिप्तसारमाचष्टे पण्डितः क्रमदीश्वरः” संक्षिप्तसारव्या० ।

**क्रमपद** पु० ऋग्वेदशब्दे १४११पृ० दर्शिते “क्रमपारः क्रमपदः क्रमजटा क्रमदण्डकश्चेति चतुष्पारायणमित्युक्ते वेदपाठप्रकारभेदे ।

**क्रमपार** पु० ऋग्वेदशब्दे १४११पृ० दर्शिते वेदपाठप्रकारभेदे

**क्रमपूरक** पु० क्रमेण पूरयति वीजम् पूरि-ण्वुल् । वकवृक्षे राजनि० तस्य पुष्पवृन्ते क्रमेण वीजपूरकत्वात्तथात्वम् ।

**क्रमशस्** अव्य० कारकार्थवृत्तेः क्रमात्+वीप्सायां शस् । क्रमं क्रमम्, क्रमेण क्रमेणेत्यादिकेऽर्थे “कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोवराः” मनुः ।

**क्रमसंग्रह** पु० श्रीकृष्णतर्कालङ्कारकृते दायाधिकारिक्रमज्ञापके ग्रन्थभेदे ।

**क्रमसन्दर्भ** पु० अनुष्ठानज्ञानज्ञापके ग्रन्थभेदे ।

**क्रमागत** त्रि० क्रमेणागतः । १कुलादिपरम्परया आगते “तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः” मनुः “अस्वतन्त्राः स्त्रियः सर्वाः पुत्रदासपरिग्रहाः । अस्वतन्त्रस्तत्र गृही यत्तु तस्य क्रमागतमिति” व्यव०त० नारदः । २पित्रादिक्रमेण प्राप्ते च “आगमोऽभ्यधिको भोगाद्विना पूर्व्वक्रमागतात्” स्मृतिः । क्रमायातादयोऽप्यत्र

**क्रमादि** पु० वेत्त्यधीते वेत्यर्थे वुन् प्रत्ययप्रकृतिभूते पा० उक्ते शब्दगणभेदे स च गणः “क्रम पद शिक्षा मीमांसा”

**क्रमि** पु० क्रम-इन् । कृमिपदार्थे । द्विरूपको० “आमाटोपापचीस्लेश्मशूलक्रमिविकारिणाम्” सुश्रु०

**क्रमिक** त्रि० क्रमादागतः ठन् । कुलक्रमागते । “आप्तैरलुब्धैः क्रमिकैस्ते च (कर्म्मान्ताः) कश्चिदनुष्ठिताः” भा० स०५अ० । क्रमोविद्यतेऽस्य ठन् । २क्रमवर्त्तिनि । “क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम्” शब्दश० प्र०

**क्रमिकण्टक** न० क्रमौ कण्टकमिव तन्नाशकत्वात् । १ङ्गुदे २चित्राङ्गे (चिता) ३उदुम्बरे च मेदि० ।